# संस्कृतवार्ताः

दिनाङ्क : 08/07/2025 सायम् - 06:20

आदौ-मुख्यवार्ताः

- प्रधानमन्त्री श्रीनरेन्द्र-मोदी अद्य सायं ब्राजील-देशस्य राष्ट्रपतिना साकं प्रतिनिधिमंडल-स्तरीयां मन्त्रणां करिष्यति।
- बिहारे महिलाभ्यः आरक्षित-सर्वकारीय-वृत्तिषु राज्य-सर्वकारेण डोमिसाइल इति स्थायि-निवास-प्रमाणपत्र-नीतेः क्रियान्वयनं निर्णीतम् । सहैव यूनां सर्वांगीण-विकासाय यूथ-कमीशन इति आयोगोपि रचितः।
- ऋतु-विज्ञान-विभागेन उक्तं यत् आगामिषु चतुर्दिवसेषु देशस्य वायव्यभागेषु पश्चिम-तटेषु च निरन्तरं प्रचण्डवृष्टेः संभावना वर्तते।
- अमेरिकायाः टेक्सास्-नगरे दुरापन्ने प्रचण्ड-जलाप्लवे मृतकानां संख्या शत-तोप्यधिका जाता, अन्वेषणाभियानं चतुर्थे दिवसेपि प्रवर्ततेतराम्।
- स्पेनदेशस्य मैड्रिड्-नगरे आयोक्ष्यमाणायाः लक्ष्यवेधन-विश्व-चषक-स्पर्धायाः चतुर्थे चरणे दीपिका-कुमारी, एशिया-क्रीडा-स्वर्णपदक-विजेत्री ज्योति-सुरेखा-वेन्नम् च भारतस्य प्रतिनिधित्वं करिष्यतः।

-------------------------------------------

पीएम-ब्राजील

प्रधानमन्त्री श्रीनरेन्द्र-मोदी ब्राजील-देशस्य राष्ट्रपतिना साकं प्रतिनिधिमंडल-स्तरीयां मन्त्रणां करिष्यति। द्वैपाक्षिक-सम्भाषणे व्यापार-रक्षा-ऊर्जा-अंतरिक्ष-प्रौद्योगिकी-कृषि-स्वास्थ्य-सहितेषु जनानां मध्ये सम्पर्क-संवर्धनेन साकं मिथो हितानां क्षेत्रेषु उभयोः देशयोः मध्ये कार्यनीतिकं साहमत्यं व्यापकी-कर्तुं ध्यानं केन्द्री-करिष्यते । उभयोः देशयोः मध्ये सम्भाषणस्य अनन्तरं नैकेषु सन्धि-पत्रकेषु हस्ताक्षराणि अपि भविष्यन्ति इति आशास्यते। ध्येयमस्ति यत् प्रधानमन्त्री सप्तदश ब्रिक्स-शिखर-सम्मेलनात् परं ह्यः रात्रौ ब्राजीलस्य

राजधानीं प्राप्तः आसीत्। ब्रासीलिया नगरस्य विमान-पत्तने मोदिन: स्वागतार्थं तत्रत्य-राजनेतृन् अतिरिच्य भारतीय-प्रवासिन: अपि समुपातिष्ठन्त। ब्राजील-देशे भारतस्य राजदूत: दिनेश-भाटिया अवदत् यत् सम्भाषण-मन्त्रणाया: पश्चात् भारत-ब्राजीलयो: मध्ये चतुर्षु सन्धि-पत्रेषु हस्ताक्षराणि भविष्यन्ति इति आशास्यते।

-----------------------------------------

## प्रधानमन्त्री नामीबिया:

पञ्च-देशानां स्वीय-यात्राया: अंतिम-चरणे प्रधानमन्त्री नरेन्द्र-मोदी नामीबिया-देशं प्रस्थास्यति। नामीबिया-देशस्य राष्ट्रपति: **नेटुम्बो नंदी-नदैतवा**-वर्यस्य निमंत्रणे श्रीमोदी नामीबिया-देशस्य विंडह्योक-नगरं सम्प्राप्स्यति। ध्येयमस्ति यत् प्रधानमन्त्रिण: मोदिन: नामीबिया-देशस्य एषा प्रथमा यात्रा वर्तते, अथ च भारतस्य तृतीय-प्रधानमन्त्रिण: नामीबिया-यात्रा भविष्यति। अपि च एषा यात्रा सप्तविंशतिः वर्षाणाम् अनन्तरं जायते। निज यात्राया: अवसरे प्रधानमन्त्री नामीबिया-देशस्य राष्ट्रपतिना **नेटुम्बो नंदी-नदैतवा-वर्येण** साकं द्वै-पाक्षिकं सम्भाषणम् आचरिष्यति। श्रीमोदी नामीबिया-देशस्य संसत्-सदनेऽपि भाषणं प्रदास्यति।

-----------------------------------------

## बिहार-निवास

बिहारे महिलानां कृते आरक्षित-सर्वकारीय-वृत्तिकृते राज्य-सर्वकारेण डोमिसाइल इति स्थायि-निवास-प्रमाणपत्र-नीते: क्रियान्वयनस्य निर्णय: कृतः अस्ति। सम्प्रति सर्वकारीय-वृत्तिषु महिला-प्रत्याशिनां कृते प्रतिशतं पञ्च-त्रिंशन्मितं आरक्षणं सुनिश्चितम् अस्ति। मुख्यमन्त्रिण: नीतीश-कुमारस्य अध्यक्षतायाम् अद्य मन्त्रि-मण्डलीय-समुपवेशने महिलानां कृते डोमिसाइल इति स्थायि-निवास-प्रमाणपत्र-नीते: क्रियान्वयनस्य निर्णय: स्वीकृतः अभूत्। अतः परं प्रतिशतं पञ्च-त्रिंशन्मितस्य आरक्षणस्य लाभ: केवलं बिहारस्य स्थायि-निवासिनीभ्य: महिला-प्रत्याशिनीभ्य: एव प्रदास्यते। एष: प्रस्ताव: सामान्य-प्रशासन-

विभागस्य पक्षत: समानीतः आसीत्। बिहार-त: बहिस्तात् आगता: महिला: अनारक्षिता: सामान्य प्रत्याशिन्य: भविष्यन्ति।

-------------------------------------------

**ऋतु-विभागः**

ऋतु-विज्ञान-विभागेन उक्तं यत् आगामिषु चतुर्दिवसेषु देशस्य वायव्य-भागेषु पश्चिमतटेषु च निरन्तरं प्रचण्डवृष्टेः संभावना वर्तते। ऋतु विभागस्यानुसारम् अद्य मध्यप्रदेशे प्रचण्डवृष्टि: भविष्यति। विभागेन आगामिषु द्वि-त्रि-दिवसेषु पश्चिमबङ्गे, ओडिशायां, झारखण्डे च अत्यधिकवृष्टेः पूर्वानुमानं कृतमस्ति । आकाशवाण्या सह सम्भाषणं कुर्वन् ऋतु-विज्ञान-विभागस्य वरिष्ठ-वैज्ञानिकः नरेशकुमारः अवदत् यत् पूर्वीय-मध्यप्रदेशस्य कृते सुरक्षादृशा रेड अलर्टः इति रक्त-सङ्केतनापि प्रसारितास्ति।

-------------------------------------------

**टेक्सास**

अमेरिकादेशस्य टेक्सास्-नगरे दुरापन्ने भयंकरे जलाप्लवे मृतकानां संख्या शत-तोप्यधिका जातास्ति, अथ च अन्वेषणस्य चतुर्थे दिने अधिक-संख्यायां जीवितानां अन्वेषणस्य सम्भावना क्षीणा जातास्ति। ध्येयमस्ति यत् केर्-काउंटी इति क्षेत्रे मृतकानां संख्या अधिका आसीत्, यत्र मिस्टिक-ए क्रिस्टिन्-इत्याख्यं ग्रीष्मकालिकं शिविरं प्रचलति स्म । अत्र हि शिविरे समागाता: अष्टाविंशति: बालिकाः मृताः सूच्यन्ते।

-------------------------------------------

**सीतारामन्-ब्रिक्स:**

वित्तमन्त्री निर्मला सीतारामन् प्रावोचत् यत् ब्रिक्स-देशानां समूह: एकं महत्वपूर्णं संघटनम् अस्ति। समावेशिता-पूर्णस्य बहुपक्षवादस्य अग्रे समुपस्थापनार्थं एष: मुख्यमञ्च: अस्ति,

तदपि सविशेषं तदा यदा वैश्विक-संस्था: संकटस्य साम्मुख्यं कुर्वन्त्यो वर्तन्ते। ह्य: **रियो डी जेनेरियो** नगरे ब्रिक्स-देशानां वित्त-मन्त्रिणां, केन्द्रीय-बैंक अधिशासिनां च समुपवेशनं सम्बोधयन्ती, असौ सुदृढ-दैशिक-याच्ञानां, विवेकपूर्ण-व्यापक-आर्थिक-प्रबन्धनानां लक्षित-राजकोषीय-उपायानां च संयोजनस्य माध्यमेन भारतस्य प्रदर्शित-नमनीयता-विषये प्रकाशं क्षिप्तवती। रूस-देशीयेन समकक्षेण एंटोन-सिलुआनोव-वर्येण साकम् समनुष्ठिते एकस्मिन् पृथग् उपवेशने, वित्तमन्त्री विशेषत: वित्तीय-क्षेत्रेण, समं **'न्यू डेवलपमेंट बैंक'**-सम्बद्ध-विषयेषु अपि द्वै-पाक्षिक-सहयोगम् आश्रित्य मन्त्राणां कृतवती । अमुना स्वीय-चीन-देशीय समकक्षेण लैन-फोआन-वर्येण साकम् अपि चर्चा-समये एतस्मिन् विषये बलं प्रदत्तं यत् भारत-चीन-देशौ विश्वस्य बृहत्तम-तीव्रतम-अर्थव्यवस्था-रूपेण समावेशीय-वैश्विक-विकासं नवाचारञ्च अग्रे नेतुम् अद्वितीय-स्थितौ वर्तेते।

-------------------------------------------

## पुरी-नॉर्वे:

शिला-तैल-प्राकृतिक-वातीन्धन-मन्त्री हरदीप-सिंह-पुरी प्रत्यपादयत् यत् भारतस्य ऊर्जा-क्षमतानाम् उन्नयानार्थं विस्तारार्थं च स्वीय-विशेषज्ञताया: लाभ-स्वीकरणार्थं नॉर्वे-देशे विभिन्न-परियोजनानां अन्वेषणं कृतमस्ति। अनेन नॉर्वे देशस्य बर्गन-नगरे नॉर्दर्न लाइट्स $CO_2$ टर्मिनल इत्यस्यापि भ्रमणं कृतम्। सहैव अमुना हाइड्रोकार्बन तत्त्वस्य अन्वेषणस्य समग्रता-विषये प्रौद्योगिकीनां प्रविधीनां च विषये चापि चर्चा विहिता, विशेष-रूपेण नॉर्वे-देशस्य ऊर्जा-विशेषज्ञै: सह गहने समुद्रे अन्वेषण-विषयेऽपि मन्त्रणा जाता।

-------------------------------------------

## सैन्यत्रयमुखाणां सम्बोधनम्

नौ-सैन्य-बल-प्रमुख: एडमिरल दिनेश त्रिपाठी, वायु सैन्य-बल-प्रमुख: एयर चीफ मार्शल ए.पी. सिंह:, सेनापति: जनरल उपेंद्र द्विवेदी च अद्य नवदिल्यां संयुक्ताभियानानां संचालन-

विषये वरिष्ठ-सैन्याधिकारिण: सम्बोधितवन्त:। अस्य कार्यक्रमस्य अवसरे, सैन्य-बल-त्रय-प्रमुखै: सैन्य-बल-त्रयस्य मध्ये सामञ्जस्य-विधानार्थं नैजी प्रतिबद्धता साम्रेडिता। भारतीय-सैन्य-बलस्य अनुसारेण, सम्बोधनेऽस्मिन् संयुक्त-परिचालन-योजनासु ध्यानं केंद्रितम् अभूत्, यत्र भविष्य-कालस्य युद्ध-परिदृश्येषु एकीकृते सामुद्रिक-संगरे वायवीय-युद्धेषु च सविशेषं बलं प्रदत्तम्।

-------------------------------------------

## भाजपा-भारतार्थव्यवस्था:

भाजपा-दलेन प्रतिपाद्यते यद् एतद् गौरवास्पदं वर्तते यत् भारतं सम्प्रति समुत्कृष्टेषु चतुर्षु देशेषु एकतमं जातम् अस्ति, यद्धि पूर्वं एका विकासरता अर्थव्यवस्था मान्यते स्म। नव दिल्ल्यां सञ्चार-माध्यमानि सम्बोधयन् भाजपा-प्रवक्ता जफर इस्लाम: प्रावोचत् यत् गतेषु एकादश वर्षेषु नरेन्द्र-मोदी-सर्वकारेण विहितै: संरचनात्मक-परिष्कारै: नीतिगतै: उपायैश्च भारतीयार्थव्यवस्था सुदृढीभवति। विश्वबैंकस्य एकस्य विवरणस्य उद्धरणं कुर्वन् असौ न्यगादीत् यत्, अस्मिन् विवरणे अपि आय-समानता-विषये वैश्विक-स्तरे भारतं चतुर्थ-स्थाने स्थापितं वर्तते। अनेन भणितं यत् भारतस्य वैदेशिक-भाण्डारे उल्लेखनीया वृद्धि: जातास्ति। अथ च निर्यात प्रकरणेषु अपि, आहत्य देशस्य निर्यातम् अस्मिन् वित्तीय-वर्षे प्रायः चतुर्विंशत्युत्तरम् अष्ट-शत-बिलियन डॉलर-मिस्तस्य ऐतिहासिके उच्च-स्तरे सम्प्राप्तम् अस्ति। साकमेव अमुना एतदपि प्रोक्तं यत् देशे सप्त-विंशतिः कोटिका: जना: निर्धनता-त: बहिरानीता: सन्ति।

-------------------------------------------

## पादप-रोपणाभियानम्-गडकरी:

सर्वकारः देशे कार्बनोत्सर्जनम् अल्पीकर्तुं राष्ट्रीय-राजमार्गान् च आधिक्येन पर्यावरणानुकूलान् विधातुं पदक्षेपान् उत्थापयति। अशेषेऽपि देशे अधुना पर्यन्तं राष्ट्रीय-

राजमार्गेषु प्रायः पादोन-पञ्च-कोट्यधिकाः पादपाः रोपिताः सन्ति अथ च सप्तति-सहस्राधिकाः वृक्षाः प्रत्यारोपिताः सन्ति। केन्द्रीय-परिवहन-राजमार्ग-मन्त्री नितिन गडकरी अद्य फरीदाबाद-नोएडा इंटरनेशनल एयरपोर्ट कॉरिडोर मध्ये एकः पादपः मातुः नाम्नि इति अभियानस्य अन्तर्गतं पादप-रोपण-अभियानस्य अवसरे एकां सभां संबोधयन् एतत् सर्वं प्रत्यपादयत्। अनेन एतदपि प्रोदितं यत् अस्मिन् वर्षे षष्टि-लक्ष-मितानां पादपानां रोपणस्य लक्ष्यं निर्धारितम् आसीत्, यद्धि अधिकमेव पूरितम् अस्ति ।

------------------------------------------

**नेपाले तोयप्लवः**

नेपालस्य रसुवा-जनपदस्य विभिन्न-भागेषु तोय-प्लव-कारणेन अवरुद्धाः नव-जनाः ससुरक्षं समुद्धृताः सन्ति। एते नेपाल-चीन सीम्नः पार्श्वे एकस्मिन् लघुनदे जलौघागमनेन अवरुद्धाः अवर्तन्त। सम्पर्क-विहीनानां सप्त-त्रिंशत्-जनानां मध्ये द्वाविंशतिः जनाः अधुना सुरक्षिताश्रये प्रापिताः वर्तन्ते। शेषाणां पञ्च-दशजनानाम् अन्वेषणं प्रचलतितराम्।

------------------------------------------

**लक्ष्यवेधनक्रीडा**

लक्ष्यवेधनक्रीडायाः विश्व चषक स्पर्धायाः चतुर्थे चरणे अद्य रात्रौ स्पेनदेशस्य मैड्रिड्-नगरे दीपिका-कुमारी, एशिया-क्रीडा-स्वर्णपदकविजेत्री ज्योति-सुरेखा-वेन्नम् च भारतस्य प्रतिनिधित्वं करिष्यतः। अस्यां स्पर्धायां षोडश-सदस्यीयं भारतीय-दलं भागं गृह्णाति । प्रतियोगितायां ऊनपञ्चाशत् देशानां षड्त्रिंशदुत्तर-त्रिशत-मितानां क्रीडकानां सहभागिता भविष्यति, स्पर्धा अस्य मासस्य त्रयोदश-दिनाङ्कपर्यन्तं च प्रचलिष्यति।

।।इति वार्ता।।